ऋ.सं. स्तिभिः कलापिनः क्लान्तशरीरचेतसः नभोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम् १६ सभद्रमुस्तं परिशुष्ककर्दमं
१ सरः खनन्नायतपोत्रमण्डलैः रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम् १७ विवस्वता तीक्ष्णतरांशुमालिना स
पङ्कतोयात्सरसोभितापितः उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति १८ समुद्धृताशेषमृणालजालकं विपन्नमीनं
द्रुतभीतसारसम् परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमम् १९ रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमा
रुतः विषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः २० सफेनलालाकुलवक्त्रसंपुटं विनिर्गतालोहितजिह्वमुन्मु
खम् तृषाकुलैर्निःसृतमद्रिगह्वरादवेक्षमाणं महिषीकुलं जलं २१ पटुतरवनदाहोच्छुष्कशष्पप्ररोहाः परुषपवनवेगाक्षिप्तसं
शुष्कपर्णाः दिनकरपरितापात्क्षीणतोयाः समन्ताद्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः २२ श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुंजम् भ्रमति गवययूथः सर्वतस्तोयमिच्छन् शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् २३ विकचन
वकुसुम्भस्वच्छसिन्दूरभासा प्रबलपवनवेगोद्भूतवेगेन तूर्णम् सहरितपलताग्रालिङ्गनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावके
न २४ ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ग्लपयति मृगवर्गं
२४ प्रान्तलग्नो दवाग्निः २५ बहुतर इव जातः शाल्मलीनां वनेषु स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् परिणतदलशाखानुत्पतन्प्रां
२३ शुवृक्षान्भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते २६ गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः सुहृद इव समेता द्वन्द्वभावं विहाय हुतवहपरिखे
दादाशु निर्गत्य कक्षाद्विपुलपुलिनदेशां निम्नगामाश्रयन्ते २७ कमलवनचिताम्बुः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचन्द्रां
शुजालः व्रजतु तव निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन २८ इति श्रीकालिदासकृतावृतुसंहारे ग्रीष्म

१५३

ऋ

श्रीगणेशायनमः प्रचण्डसूर्यः स्पृहणीयचंद्रमाः सदावगाहक्षतवारिसंचयः दिनांतरम्योभ्युपशांतमन्मथो निदाघकालः समुपाग
तः प्रिये १ निशाः शशांकक्षतनीलराजयः क्वचिद्विचित्रं जलयंत्रमंदिरं मणिप्रकाराः सरसं च चंदनं शुचौ प्रिये यांति जनस्य सेव्यतां २
सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकंपितं मधु सुतंत्रिगीतं मदनस्य दीपनं शुचौ निशीथेनुभवंति कामिनः ३ नित
म्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचंदनैः शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयंति कामिनां ४ नितांत
लाक्षारसरागलोहितैर्नितम्बिनीनां चरणैः सनूपुरैः पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथं ५ पयोधराश्चंदनपंक
चर्चितास्तुषारगौरार्पितहारशेखराः नितम्बदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकं ६ समुद्गतस्वेदचितांगसंधयो विमुच्य वा
सांसि गुरूणि सांप्रतं स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयंते प्रमदाः सयौवनाः ७ सचंदनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमंडला
र्पितैः सवल्लकीकाकलिगीतनिस्वनैर्विबोध्यते सुप्त इवाद्य मन्मथः ८ सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चंद्रमाः विलो
क्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पांडुतां ९ असह्यवातोद्धतरेणुमंडला प्रचंडसूर्यातपतापिता मही न शक्यते द्रष्टुमपि प्र गु
ऋ वासिभिः प्रियावियोगानलदग्धमानसैः १० मृगाः प्रचंडातपतापिता भृशं तृषा महत्या परिशुष्कतालवः वनांतरे तोयमिति प्रधाविता निरीक्ष्य भि
न्नांजनसन्निभं नभः ११ सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनां अनंगसंदीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूष
णाः १२ रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि तप्तपांसुभिः अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति १३ तृषा
महत्या हतविक्रमोद्यमः श्वसन्मुहुर्दूरविदारिताननः न हन्त्यदूरेपि गजान्मृगाधिपो विलोलजिह्वश्चलिताग्रकेशरः १४ विशुष्ककंठोद्गतशी
कराम्भसो गभस्तिभिर्भानुमतोभितापिताः प्रवृद्धतृष्णोपहता जलार्थिनो न दंतिनः केसरिणोपि बिभ्यति १५ हुताग्निकल्पैः सवितुर्मरी

ऋ॰सं॰ २ स्खलैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः १६ कदम्बसर्ज्जार्जुननीपकेतकीर्विकम्पयन्तत्कुसुमाधिवासितः सशी
कराम्भोधरसंगशीतलः समीरणः कं न करोति सोत्सुकम् १७ शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः स्तनैः
सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं संजनयन्ति कामिनां १८ तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलम्बिनः स्त्रियश्च का
ञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत्प्रवासिनाम् १९ मालाः कदम्बनवकेशरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य क
र्णान्तरेषु ककुभद्रुममञ्जरीभिरिच्छानुकूलरचितानवतंसकांश्च २० कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः पुष्पावतंससुरभीकृतकेशपाशाः
श्रुत्वा ध्वनिं जलमुचां निशितं गृहासु शय्यागृहे गुरुगृहात्प्रविशन्ति नार्यः २१ कुवलयदलनीलैरुन्नतैस्तोयनम्रैर्मृदुपवनविधूतैर्मन्दमन्दं
ल॰ चलद्भिः अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः पथिकजनवधूनां तद्वियोगाकुलानां २२ मुदित इव कदम्बैर्जातपुष्पैः समन्तात्पवनचलितशाखैः शा
खिभिर्नृत्यतीव हसितमिव विधत्ते सूचिभिः केतकीनां नवसलिलनिषेकच्छिन्नतापो वनान्तः २३ शिरसि बकुलमालां मालतीभिः समेतां कु
सुमितनवपुष्पैर्यूथिकाकुड्मलैश्च विकचनवकदम्बैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत्काल एषः २४ दधति कुचयुगाग्रैरुन्न
तैर्हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः नवजलकणसेकादुद्गतां रोमराजीं ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः २५ नवजलकण
सेकाच्छीततामादधानः कुसुमभरनतानां लासकः पादपानां जनितरुचिरगन्धः केतकीनां रजोभिः परिहरति नभस्वान्प्रोषितानां मनांसि २६
जलभरनमितानामाश्रयोऽस्माकमुच्चैरयमिति जलसेकैस्तोयदास्तोयनम्राः अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लादयन्तीव
विन्ध्यम् २७ बहुगुणरमणीयः कामिनीचित्तहारी तरुविटपलतानां बान्धवो निर्विकारः जलदसमय एषः प्राणिनां प्राणभूतो दिशतु तव हितानि राम
प्रायशो वाञ्छितानि २८ इति श्रीकालिदासमहाकविकृते ऋतुसंहारे प्रावृड्वर्णनो नाम द्वितीयः सर्गः २ काशांशुका विकचपद्ममनोज्ञव २

सशीकराम्भोधरमत्तकुंजरस्तडित्पताकोऽशनिशब्दमर्दलः समागतो राजवदुद्धतद्युतिर्जलागमः कामिजनप्रियः प्रिये १ नितान्तनीलो
त्पलपत्रकान्तिभिः क्वचित्प्रभिन्नाञ्जनराशिसन्निभैः क्वचित्सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः २ तृषाकुलैश्चातकप
क्षिणांकुलैः प्रयाचितास्तोयभरावलम्बिनः प्रयान्ति मन्दं बहुवारिवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ३ बलाहकाश्चाशनिशब्दमर्दलाः सु
रेन्द्रचापं दधतस्तडिद्गुणम् सुतीक्ष्णधारापतनोग्रसायकैस्तुदन्ति चेतः प्रसभं प्रवासिनाम् ४ प्रभिन्नवैदूर्यनिभैस्तृणांकुरैः समाचिता प्रोत्थि
तकन्दलीदलैः विभाति शुक्लेतररत्नभूषिता वराङ्गनेव क्षितिरिन्द्रगोपकैः ५ सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकीर्णविस्तीर्णकलापशोभितं
ससम्भ्रमालिङ्गनचुम्बनाकुलं प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ६ निपातयन्त्यः परितस्तटद्रुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः स्त्रियः प्रदु
ष्टा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ७ तृणोत्करैरुद्गतकोमलांकुरैर्विचित्रनीलैर्हरिणीमुखक्षतैः वनानि रम्याणि हरन्ति मान
सं विभूषितान्युद्गतपल्लवैर्द्रुमैः ८ विलोलनेत्रोत्पलशोभिताननैर्मृगैः समन्तादुपजातसाध्वसैः समाचिता सैकतिनी वनस्थली समुत्सुकत्वं
प्रकरोति चेतसः ९ सुतीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः १
० पयोधरैर्भीमगभीरनिस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम् कृतापराधानपि योषितः प्रियान्परिष्वजन्ते शयने निरन्तरम् ११ विलोचनेन्दी
वरवारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवाः निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनां १२ विपाण्डुरं कीटरज
स्तृणान्वितं भुजङ्गवद्वक्रगतिप्रसर्पितं ससाध्वसैर्भेककुलैर्विलोकितं प्रयाति निम्नाभिमुखं नवोदकं १३ विपन्नपुष्पां नलिनीं समुत्सुका वि
हाय भृङ्गाः श्रुतिहारिनिस्वनाः पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया १४ वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्व
नतां मुहुर्मुहुः कपोलदेशा विमलोत्पलप्रभाः सभृङ्गयूथैर्मदवारिभिश्चिताः १५ सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः प्र

ऋ॰ सं॰ पु

स्थस्थिताण्डजकुलप्रतिनादितानि पर्यंतसंस्थितमृगीनयनोत्पलानि प्रोत्कंठयंत्युपवनानि मनांसि पुंसां १४ संपन्नशालिनिचयावृतभू
तलानि स्वस्थस्थितप्रचुरगोकुलशोभितानि हंसैः ससारसकुलैः प्रतिनादितानि सीमांतराणि जनयंति नृणां प्रमोदं १५ हंसैर्जिता सुललिता
गतिरंगनानामंभोरुहैर्विकसितैर्मुखचंद्रकांतिः नीलोत्पलैर्मदकलानि विलोचनानि भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरंगैः १६ श्यामालताः कुसु
मभारनतप्रवालाः स्त्रीणां हरंति धृतभूषणबाहुकांतिं दंतावभासविशदस्मितरंतकांतिं बंधूकपुष्परचिता नवमालती च १७ केशान्नितांतघ
ननीलविकुंचिताग्रानापूरयंति वनिता नवमालतीभिः कर्णेषु च प्रवरकांचनकुंडलेषु नीलोत्पलानि विविधानि निवेशयंति १८ हारैः सचंदनरसैः
स्तनमंडलानि श्रोणीतटं सुविपुलं रसनाकलापैः पादांबुजानि कलनूपुरशेखरैश्च नार्यः प्रहृष्टमनसोद्य विभूषयंति १९ स्फुटकुमुदचितानां रा
जहंसाश्रितानां मरकतमणिभासा वारिणा भूषितानां श्रियमतिशयरूपां व्योमतोयाशयानां वहति विगलितमेघं चंद्रतारावकीर्णं २० शरदि कुमुदसंगाद्वा
यवो वांति शीता विगतजलदवृंदा दिग्विभागा मनोज्ञाः विगतकलुषमंभः श्यानपंका धरित्री विमलकिरणचंद्रं व्योम ताराविचित्रं २१ दिवसकरमयूखैर्बोध्य
मानं प्रभाते वरयुवतिमुखाभं पंकजं जृंभतेद्य कुमुदमपि गतेस्तं लीयते चंद्रबिंबे हसितमिव वधूनां प्रोषितेषु प्रियेषु २२ असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु क्व
णितकनककांचीं मत्तहंसस्वनेषु अधररुचिरशोभां बंधुजीवे प्रियाणां पथिकजन इदानीं रोदिति भ्रांतचित्तः २३ स्त्रीणां विहाय वदनेषु शशांकलक्ष्मीं
काम्यं च हंसवचनं मणिनूपुरेषु बंधूककांतिमधरेषु मनोहरेषु क्वापि प्रयाति सुभगा शरदागमश्रीः २४ विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी कुसुमितनववेशा
व्याकुला सन्निवासा कुमुदरुचिरहासा कामिनीवोन्मदेयं शुभमुपहरतु शरद्वश्चेतसः प्रीतिमुग्रां २५ इति श्रीकालिदासकृतावृतुसंहारे महाकाव्ये शरद्वर्णनं नाम राम
तृतीयः सर्गः ३ नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः विलीनपद्मः प्रपतत्तुषारो हेमंतकालः समुपागतोयं १ मनोहरैः कुंकुम ३

पु२

ङ्गशोन्मादहंसरुतनूपुरनादरम्या आपक्वशालिरुचिरातनुगात्रपुष्टिः आप्ता शरन्नववधूरिव चारुरूपा १ काशैर्मही शिशिरदीधिति
नारजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः २ चंचन्मनोज्ञशफरीरस
नाकलापाः पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः नद्यो विशालपुलिनोच्चनितम्बबिम्बा मंदं प्रयांति समदाः प्रमदा इवाद्य ३ व्योम क्वचिद्रजतशंखमृणा
लगौरैस्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरशतैरुपवीज्यमानः ४ भिन्नाञ्जनप्रचुरकान्तिनभो मनोज्ञं
बंधूकपुष्परजसारुणिता च भूमिः वप्राश्च पक्वकलमावृतभूमिभागाः प्रोत्कंठयंति न मनो भुवि कस्य यूनः ५ मंदानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः ६ तारागणप्रचुरभूषणमुद्वहंती मेघोपरोध
परिमुक्तशशांकवक्त्रा ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ७ कारंडवाननविघट्टितवीचिमालाः कादम्ब
सारसकुलाकुलतीरदेशाः कुर्वंति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ८ नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः
शिशिरशीकरवारिवर्षी पत्युर्वियोगविषदग्धशराहतानां चंद्रो दहत्यतितरां तनुमंगनानां ९ आकम्पयन्फलभरानतशालिजालान्यानर्तयं
स्तरुवरान्कुसुमावनम्रान् उत्फुल्लपंकजवनां नलिनीं विधुन्वन् यूनां मनश्चलयति प्रसभं नभस्वान् १० सोन्मादहंसमिथुनैरुपशोभितानि स्व
च्छप्रफुल्लकमलोत्पलभूषितानि मंदप्रभातपवनोद्गतवीचिमालान्युत्कंठयंति हृदयं सहसा सरांसि ११ नष्टं धनुर्बलभिदो जलदोदरेषु सौदा
मिनी स्फुरति नाद्य वियत्पताका धुन्वंति पक्षपवनैर्न नभो बलाकाः पश्यंति नोन्नतमुखा गगनं मयूराः १२ नृत्यप्रयोगरहितान् शिखिनो विहाय हं
सानुपैति मदनो मधुरप्रगीतान् मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान् सप्तच्छदानुपगता कुसुमोद्गमश्रीः १३ शेफालिकाकुसुमगन्धमनोहराणि

ऋ.सं. ४ ङ्गनाः सुमिश्रितैलीकृतगात्रयष्ट्यः संत्यक्तमाला मिथुनीरूपेषो परार्ध्यश्रृंगजने विरूपसेव्रमराः सुशोभम् १८ बहुगुणरमणीयो योषितां चित्तहा-
री परिणतबहुशालिव्याकुलग्रामसीमः सततमतिमनोज्ञः क्रौंचमालापरीतः प्रदिशतु हिमयुक्तः काल एषः प्रियं वः १९ इति श्रीकालिदास-
कृता ऋतुसंहारे महाकाव्ये हेमन्तवर्णनो नाम चतुर्थः सर्गः ४ प्ररूढशालीक्षुचयावृतक्षितिं क्वचित्स्थितक्रौंचनिनादशोभितं प्रवृद्धकाम-
मंप्रमदाजनप्रियं वरोरु कालं शिशिराह्वयं शृणु १ निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति काले
ऽत्र जनस्य सेव्यताम् २ न चंदनं चंद्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलं न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति सांप्रतम् ३ तुषारसंघातनिपातशी-
तलाः शशांकभाभिः शिशिरीकृताः पुनः विपाण्डुतारागणचारुभूषणा जनस्य सेव्या न भवन्ति रात्रयः ४ गृहीतताम्बूलविलेपनस्रजः पुष्पासवामोदितवक्त्रप-
ङ्कजाः प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ५ कृतापराधान्बहुशोऽपि तर्जितान्सवेपथून्साध्वसलुप्तचेतसः निरीक्ष्य भर्तॄन्सुरताभिला-
षिणः स्त्रियोऽपराधान्समदा विसस्मरुः ६ प्रकामकामैर्युवभिः सुनिर्दयं निशासु दीर्घास्वभिरामिताश्चिरं भ्रमन्ति मन्दं श्रमखेदितोरवः क्षपावसाने नवयौवनाः
स्त्रियः ७ मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयविभूषितोरवः निवेशितान्तःकुसुमैः शिरोरुहैर्विभूषयन्तीव हिमागमं स्त्रियः ८ पयोधरैः कुंकुमरागपिञ्ज-
रैः सुखोपसेव्यैर्नवयौवनोष्मभिः विलासिनीभिः परिपीडितोरसः स्वपन्ति शीतं परिभूय कामिनः ९ सुगन्धिनिःश्वासविकंपितोत्पलं मनोहरं कामरतिप्रबोधनं
निशासु हृष्टाः सह कामिभिः स्त्रियः पिबन्ति मद्यं मदनीयमुत्तमम् १० अपगतमदरागा योषिदेका प्रभाते कृतनिबिडकुचाग्रा पत्युरालिंगनेन प्रियतमपरिभुक्तं वी-
क्षमाणा स्वदेहं व्रजति शयनवासाद्वासमन्यं हसन्ती ११ अगुरुसुरभिधूपामोदितं केशपाशं गलितकुसुममालं कुञ्चिताग्रं वहन्ती त्यजति गुरुनितम्बा निम्न-
नाभिः सुमध्योषसि शयनमन्या कामिनी कामशोभं १२ कनककमलकान्तैश्चारुताम्राधरोष्ठैः श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः उषसि वदनबिम्बैरंससंसक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य १३ पृथुजघनभरार्ताः किञ्चिदानम्रमध्याः स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः सुरतसमयवेषं नैशमाशु प्रहाय

गपिंजौरैः सुपारकुंदैर्नुनिभैश्चरूपैः विलासिनीनां सेन शालिनीनां मलंत्रि पनेस्तनमंडलानि २ कांच्यीगुणैः कांचनरत्नचित्रैर्विभूषयंति प्रमदा नि ।
तम्बमूलं पुष्पैर्हेसरुतं कुसाद्रिः पारामबुजान्यंबुजकांतिभांति ३ नेयाह्युगेषु विलासिनीनां प्रयांति स ३ वलयपाद्दानि नितम्बविवे पुनर्न
द्कूलं तेन्वेहाके पीनपयोधरेषु ४ गात्राणि कालीयकरंजितानि सपत्रलेखानि मुखांबुजानि शिरांसि कालागुरुवासितानि कुर्वंति नार्यः सुर
तोत्सवाय ५ रतिश्रमाराविलपांडुवक्त्राः प्राप्तप्रहर्षाभ्युदयेन रूपः हसंति नोच्चैर्दशनाग्रभिन्नान्प्रकंपयान्तीन परां विलासं ६ पुनस्तनी
स्पलग्नालयोभासा घनसीधुकांताः सुवरः स्तनाग्रलेनसुनिनेः पुनर्विमुक्ताः सलीला विषसि शीतकाला ७ हदसमाना विद्युत मनु पूर्व कुप ।
वेनकल्पलनेनेनरत्नमयूखबालललनेनरक्तांशुर्निः पतद्भिः रमेत काले नन्नु रोदितीव ८ प्रमत्त शालिप्रसवे श्चितानि गाढ्ननांशुयाविभूषितानि
नो हरत्नौ च निनादितानि सीमन्त राणुत्सुकपांथवेत ९ अब्जुत्वनीलोत्पलशोभितानि सरांसि कादम्बविभूषितानि प्रसन्नतोयानि सुशीत
लानि सरेंवचेतांसि हरंति पुंसाम् १० पाकतूज्जैतीस्तियोतसंकाराः पनानासनतमरू प्रियेयप्रियकुः प्रियविप्रयुक्ताविपांडुतांयाति वि
लासिनीव ११ पुष्पासवामोदसुगंधिवक्त्रो निश्वासवातैः सुरभीकृतांगः परस्पराङ्गव्यतिषक्तशायी शेते जनः कामशरानविद्ध १२ दंतच्छदैः
सव्रणदंतचिन्हैः स्तनैश्च पाणिग्रहकृताभिलेखैः संसूच्यते निर्दयमंगनानां रतोपभोगो नवयौवनानाम् १३ काचिद्विभूषयति दर्पणसक्तहस्ता
रोषाद्रपेतुवरनातुरनारविंदं रस्तलक्त प्रियतमेन निपीतसारं दलोयं भिन्नमुखरूप्यतिरीसते च १४ अन्याः प्रकामसुरतश्रमखिन्नदेहा रात्रिप्र
जागरविपाटलनेत्रपद्मा शवर्त्तिराललितांकुलकेशपाशा निद्रां प्रयांति मृदुसूर्यकराभितप्ता १५ निर्माल्यदाममपरिभुक्तमनोज्ञगंधं मू
र्ध्नापनोपघनलीलशिरोरुहानां पीनोन्नतस्तनभरानतगात्रयष्ट्यः कुर्वंति केशरचनामपरास्तरुण्यः १६ अन्याप्रियेणपरिभुक्तमवेक्ष्य गात्रं हर्षा
न्विता विरचिताधरभागशोभा कूर्पासकं परिदधाति नखक्षतांगी व्यालंबिनीलललितालककुंचिताक्षी १७ अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं

ष.भै.
९

विपद्ध कालीयमहरूरु मानि सलनाग्रभोगेषु विचरन्वितादिकानि पतेचन्स्न मङ्गनाभिर्मिरालसाभिर्युनाभिपुकम् १३ गुरुशिवासांति विशापद
लंसन्दैन्त्रालासरसरंजितानि सुगंधिकालागुरु धूपितानि धत्तेजनः काममदालसाङ्गः १४ पुंस्कोकिल श्रुतरसास्रवेनमत्तः प्रियांचुम्बति रामरतः गुंजद्विरेफोप्यमह
अस्यवक्त्राग्नि प्रियाया प्रकरोतिचाटम् १५ चलतप्रवालास्तवकावनताः मूतद्रुमाः पुष्पितचारुशाखाः कुर्वंति कांतेपवनोत्सुकाः पर्युत्सुकं मानसंनाव नानाव १६ आमूल
तोविद्रुमरागताम्राः सपल्लवाः पुष्पचयं दधानाः कुर्वंत्यशोका हृदयं सशोकं निरीक्ष्यमाणा नववौवनानाम् १७ मत्तद्विरेफपरिचुम्बनगारु चाम्राः संलिष्टक
लितनम्रमद्रुमवालाः कुर्वंति काममनसां सहसोत्सुकंत्वं ताविमुक्तकलिकाः समवेक्ष्यमाणाः १८ कांतामुखद्युतिमनोहरमुज्ज्वलानां शोभाम्यसंकुरवक
कुसुमञ्जरीणाम् दृष्ट्वा प्रियेहृदयमन्यमवेक्ष्य कस्य कंदर्पबाणपतनव्यथितं हि चेतः १९ आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः स
द्योवसंतसमयेन समागतेन रक्ताम्बुरा नववधूरिव भाति भूमिः २० किंकिंशुकैः शुकमुखच्छविभिर्न भिन्नं किं कर्णिकारकुसुमैर्न कृतं न दग्धं यत्कोकिलः
पुनरयं मधुरैर्वचोभिर्यूनां मनः सुवदने निपतंति हंति २१ पुंस्कोकिलः कलवचोभिरुपात्तहर्षैः कूजद्भिरुन्मदकलानि वचांसि रंभैः लज्जान्वितं सविनयं हृदयंक्ष
णेन पर्याकुलं कुलगृहेपि कृतं वधूनां २२ आकंपयन्कुसुमितां सहकारशाखां विस्तारयन्परभृतस्य वचांसि दिक्षु वायुर्विवाति हृदयानि हरन्नराणां नीहारपातविगमे सुभ
गोवसंते २३ कुंदैः सविभ्रमवधूहसितावदातैरुद्योतितान्युपवनानि मनोहराणि चित्तं मुनेरपि हरंति निवृत्तरागं प्रागेवरागमलिनानि मनांसि यूनां २४ आलंबि
हेमरसनाः स्तनसक्तहाराः कंदर्पदर्पशिथिलीकृतगात्रयष्ट्यः मासे मधौ मधुरकोकिलभृंगनादैर्नार्यो हरंति हृदयं प्रसभं नराणां २५ नानामनोज्ञकुसुमद्रुमभू
षितांतान्हृष्टान्यपुष्टनिनदाकुलसानुदेशान् शैलेयजालपरिणद्धशिलातलांतान् दृष्ट्वा जनः क्षितिभृतोमदमेति सर्वः २६ नेत्रे निमीलयति रोदिति याति मोहं घ्राणं करेण विरुणद्धि

राम
५

नखपदचितभागान्वीक्षमाणाःस्तनान्तानधरकिसलयाग्रंदन्तभिन्नंस्पृशंत्यः अभिमतरसभेदानन्दयन्त्यस्तरुण्यः सवितुरुदयका
लेमंडयंत्याननानि १५ प्रचुरगुडविकारःस्वादुशालीक्षुरम्यः प्रबलसुरतकेलिर्जातकन्दर्पदर्पः प्रियजनसहितानांचित्तसन्तोषहेतुः
शिशिरसमयएषश्रेयसेवोस्तुनित्यम् १६ इति श्री कालिदासकृतावृतुसंहारेमहाकाव्येशिशिरवर्णनोनामपंचमःसर्गः ५॥
प्रफुल्लचूतांकुरतीक्ष्णशायकोद्विरेफमालाकृततद्गुणः मनांसिवेद्धुंसुरतप्रसङ्गिनांवसन्तयोधःसमुपागतःप्रिये १ द्रुमाःसपुष्पाःसलिलंसपद्मंस्त्रियःसका
माःपवनःसुगंधिःसुखाःप्रदोषादिवसाश्चरम्याःसर्वंप्रियेचारुतरंवसन्ते २ नतद्रुमंयत्रफलानतद्रुमंनतद्रुलंपल्लवसुन्दरंकोकिलमत्तकोकिलैःसोन्मत्तकूज
मल्कलनकूजितंसन्नहृतंवधूमनः ३ वापीजलानांमणिमेखलानांशशांकभासांप्रमदाजनानांचूतद्रुमाणांकुसुमान्वितानांददातिसौभाग्यमयंवसन्त ४ स्तने
षुहाराःसितचन्दनार्द्राभुजेषुसंगवलयाङ्गदानिप्रयान्तिनिःशंकमनंगसौख्यंनितम्बिनीनांजघनेषुकाञ्च्यः ५ कुसुम्भरागारुणितैर्दुकूलैर्नितम्बबिम्बानिविला
सिनीनाम् तन्वंशुकैःकुंकुमरागगौरैरलंक्रियन्तेस्तनमण्डलानि ६ कर्णेषुयोग्यंनवकर्णिकारंचलेषुनीलेष्वलकेष्वशोकैः शिखासुफुल्लान्नवमल्लिका
श्चप्रयान्तिकान्तिंप्रमदाजनस्य ७ सपत्रलेखेषुविलासिनीनांमुखेषुहेमाम्बुरुहोपमेषुरत्नान्तरेमौक्तिकसंगरम्यःस्वेदागमोविस्तरतामुपैति ८ उच्छ्वासय
न्त्यःश्लथबन्धनानिगात्राणिकन्दर्पसमाकुलानिसमीपवर्तिष्वधुनाप्रियेषुसमुत्सुकाएवभवन्तिनार्यः ९ तनूनिरोमाणिसमन्यपाणिपानुर्मुहुर्मुहुर्जृम्भणतत्प
राणिअङ्गान्यनङ्गःप्रमदाजनस्यकरोतिलावण्यससंभ्रमाणि १० नेत्रेषुलोलोमदिरालसेषुगण्डेषुपाण्डुःकठिनःस्तनेषुमध्येषुनम्रोजघनेषुपीनःस्त्रीणा
मनङ्गोबहुधास्थितोद्यः ११ अङ्गानिनिद्रालसविभ्रमाणिवाक्यानिकिंचिन्मदलालसानिभ्रूक्षेपजिह्मानिचवीक्षितानिचकारकामःप्रमदाजनानाम् १२

ऋ॰ सं॰
व॰ न॰

छिविरो नितंबैः कान्ताविमोगपरिखेदितचित्तवृत्तिर्दृष्ट्वाध्वगः कुसुमितान्सहकारवृक्षान् २७ समदमधुकराकोकिलानां चनादैः ॥
कुसुमितसहकारैः कर्णिकारैश्च रम्यः इषुभिरिव सुतीक्ष्णैर्मानसं कामिनीनां सुदति कुसुममासो मन्मथोद्दीपनाय २८ रुचिरकन
ककान्तिमुम्पितपल्लवाग्रैर्मन्दपवनविधूतैः पुष्पितैश्चूतवृक्षैः अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे मदनशरनिघातैर्मोहमेति प्र
वासी २९ परभृतकलगीतैर्ह्लादिभिः सद्वचांसि स्मितदशनमयूखान्कुन्दपुष्पप्रभाभिः करकिसलयकान्तिं पल्लवैर्विद्रुमाभैरभिभवति वस
न्तः कामिनीनामिदानीम् ३० कनककमलकान्तैराननैः पीतवस्त्रैः रुचिरनिहितरोमस्पन्दनाः स्तनान्तेऽभिनवजनितविलासैर्लोलसद्भिः पुष्पैः
मुनिजनमपि नर्मः कामयन्त्येषा नूनम् ३१ मधुसुरभिमुखाब्जं लोचने लोलतारे नवकुरवककुन्दैः केशपाशे मनोज्ञैः स्तनवसनमनोज्ञो
मिविमंतयैवस्तनकमलमिदानीं योषितां किन्नचारु ३२ आकंपितानि हृदयानि मनस्विनीनां वातैः प्रफुल्लसहकारकृताधिवासैः उत्सि
तैः परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च गीतशब्दैः ३३ रम्यः प्रदोषसमयः स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः
मत्तालिपुंजविरुतानि निशि सीधुपानं सर्वं रसायनमिदं कुसुमायुधस्य ३४ छायाजनैः सुमुखि काङ्क्षति पादपानां शैत्यं तथैव च वारि किं रसा।
चमानाः हर्म्येषु पातितचरितं पृथुशीतलेषु कान्तामुखाम्बुजमुपरि हृतिशीतलत्वात् ३५ इ श्री लि स ता तु रा म को स व
नो म ह र्गः ॥ ६ ॥ ग्रं ॥ ग ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ग ॥ ग्रं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

६

राम

संग्रहः

श्रीकार्त्तिकादिषु मासास्तिथिश्च वक्षिणुणं मेवे तेसस्मिन्छ हरे ङ्गुगं गं ष्ठे श्राद्धि उच्यते ता अघोरा २ कालय त्रिष्ठ २ ं ङ्गा गि रु त्रि
कटा ३ ज्वरा ५ जया ३ ग्वसस्म रा त्रि ज्ञ कौ ति ला २ तिथि श्च छ गुणी कन्या दी ने वे ं कारये त्स मि श्र हरे ङ्गा गं गे रा ं करा ं च्यते
चैत्रादि मासे तिथिलग्न पुत्रा गर्भादि मासा त्रि भाग ळ त्या स वे च पुत्रा दि तो नि नं वा न्या सु न्यं व सु न्य पु त्रा न्सु त्रि श्यो म ळ ळ प्य ळ